# सुन्दरकाण्ड पञ्चपञ्चाशः सर्गः (५५) - ॥ हनुमतस्त्रासः ॥

सन्दीप्यमानां विध्वस्तां त्रस्त रक्षोगणां पुरीम् ।
अवेक्ष्य हनुमाँल् लङ्कां चिन्तयामास वानरः ॥ १ ॥

तस्याभूत् सुमहांस्त्रासः कुत्सा चात्मन्य जायत ।
लङ्कां प्रदहता कर्म किंस्वित् कृतमिदं मया ॥ २ ॥

धन्यास्ते पुरुषश्रेष्ठा ये बुद्ध्या कोपमुत्थितम् ।
निरुन्धन्ति महात्मानो दीप्तमग्नि मिवाम्भसा ॥ ३ ॥

क्रुद्धः पापं न कुर्यात्कः क्रुद्धो हन्याद् गुरूनपि ।
क्रुद्धः परुषया वाचा नरः साधू नधिक्षिपेत् ॥ ४ ॥

वाच्या वाच्यं प्रकुपितो न विजानाति कर्हिचित् ।
नाकार्य मस्ति क्रुद्धस्य नावाच्यं विद्यते क्वचित् ॥ ५ ॥

यः समुत्पतितं क्रोधं क्षमयैव निरस्यति ।
यथोरगस् त्वचं जीर्णां स वै पुरुष उच्यते ॥ ६ ॥

धिगस्तु मां सुदुर्बुद्धिं निर्लज्जं पाप कृत्तमम् ।
अचिन्तयित्वा तां सीता मग्निदं स्वामि घातकम् ॥ ७ ॥

यदि दग्धा त्वियं लङ्का नून मार्यापि जानकी ।
दग्धा तेन मया भर्तुर् हतं कार्य मजानता ॥ ८ ॥

यदर्थमय मारम्भस् तत् कार्य मवसादितम् ।
मया हि दहता लङ्कां न सीता परिरक्षिता ॥ ९ ॥

ईषत् कार्यमिदं कार्यं कृतमासीन्न संशयः ।
तस्य क्रोधाभि भूतेन मया मूलक्षयः कृतः ॥ १० ॥

विनष्टा जानकी नूनं न ह्यदग्धः प्रदृश्यते ।
लङ्कायां कश्चिदुद्देशः सर्वा भस्मीकृता पुरी ॥ ११ ॥

यदि तद् विहतं कार्यं मम प्रज्ञा विपर्ययात् ।
इहैव प्राण संन्यासो ममापि ह्यद्य रोचते ॥ १२॥

किमग्नौ निपताम्यद्य आहोस्विद् बडवा मुखे ।
शरी रमाहो सत्त्वानां दद्मि सागर वासिनाम् ॥ १३ ॥

कथं हि जीवता शक्यो मया द्रष्टुं हरीश्वरः ।
तौ वा पुरुष शार्दूलौ कार्य सर्वस्व घातिना ॥ १४ ॥

मया खलु तदेवेदं रोष दोषात् प्रदर्शितम् ।
प्रथितं त्रिषु लोकेषु कपित्व मनवस्थितम् ॥ १५ ॥

धिगस्तु राजसं भाव मनीश मनवस्थितम् ।
ईश्वरेणापि यद्रागान् मया सीता न रक्षिता ॥ १६ ॥

विनष्टायां तु सीतायां तावुभौ विनशिष्यतः ।
तयोर् विनाशे सुग्रीवः सबन्धुर् विनशिष्यति ॥ १७ ॥

एतदेव वचः श्रुत्वा भरतो भ्रातृ वत्सलः ।
धर्मात्मा सह शत्रुघ्नः कथं शक्ष्यति जीवितुम् ॥ १८ ॥

इक्ष्वाकु वंशे धर्मिष्ठे गते नाश मसंशयम् ।
भविष्यन्ति प्रजाः सर्वाः शोक सन्ताप पीडिताः ॥ १९ ॥

तदहं भाग्य रहितो लुप्त धर्मार्थ सङ्ग्रहः ।
रोषदोष परीतात्मा व्यक्तं लोक विनाशनः ॥ २० ॥

इति चिन्तयतस् तस्य निमित्तान् युपपेदिरे ।
पूर्वमप्युप लब्धानि साक्षात् पुन रचिन्तयत् ॥ २१ ॥

अथवा चारु सर्वाङ्गी रक्षिता स्वेन तेजसा ।
न नशिष्यति कल्याणी नाग्निरग्नौ प्रवर्तते ॥ २२ ॥

न हि धर्मात्मनस् तस्य भार्या ममित तेजसः ।
स्वचारित्राभि गुप्तां तां स्वप्तु मर्हति पावकः ॥ २३ ॥

नूनं राम प्रभावेन वैदेह्याः सुकृतेन च ।
यन्मां दहन कर्मायं नादहद् धव्य वाहनः ॥ २४ ॥

त्रयाणां भरतादीनां भ्रातॄणां देवता च या ।
रामस्य च मनःकान्ता सा कथं विनशिष्यति ॥ २५ ॥

यद्वा दहन कर्मायं सर्वत्र प्रभुरव्ययः ।
न मे दहति लाङ्गूलं कथमार्यां प्रधक्ष्यति ॥ २६ ॥

पुनश्चा चिन्तयत् तत्र हनुमान् विस्मितस् तदा ।
हिरण्य नाभस्य गिरेर् जलमध्ये प्रदर्शनम् ॥ २७ ॥

तपसा सत्य वाक्येन अनन्यत्वाच्च भर्तरि ।
अपि सा निर्दहे दग्निं न तामग्निः प्रधक्ष्यति ॥ २८ ॥

स तथा चिन्तयंस् तत्र देव्या धर्म परिग्रहम् ।
शुश्राव हनुमान् वाक्यं चारणानां महात्मनाम् ॥ २९ ॥

अहो खलु कृतं कर्म दुष्करं हि हनूमता ।
अग्निं विसृजता भीक्ष्णं भीमं राक्षस सद्मनि ॥ ३० ॥

प्रपलायित रक्षःस्त्री बाल वृद्ध समाकुला ।
जन कोलाहलाध् माता क्रन्दन्ती वाद्रि कन्दरे ॥ ३१ ॥

दग्धेयं नगरी सर्वा साट्ट प्राकार तोरणा ।
जानकी न च दग्धेति विस्मयोऽद्भुत एव नः ॥ ३२ ॥

स निमित्तैश्च दृष्टार्थैः कारणैश्च महागुणैः ।
ऋषि वाक्यैश्च हनुमा नभवत् प्रीत मानसः ॥ ३३ ॥

ततः कपिः प्राप्त मनोरथार्थः
तामक्षतां राज सुतां विदित्वा ।
प्रत्यक्ष तस्तां पुनरेव दृष्ट्वा
प्रति प्रयाणाय मतिं चकार ॥ ३४॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये सुन्दरकाण्डे पञ्चपञ्चाशः सर्गः ॥ ५५ ॥